This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-764

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M764 विषय धर्मशास्त्र.
नाव. आचमन उपयमन प्रयोग.
लेखक/लिपीकार –.
पृष्ठ 25 काळ – पूर्ण/अपूर्ण

194-W

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ७ ॥ ॥श्रीगणेशायनमः॥ अथउपनयनआरंभः॥तत्रादौगर्भाधा
नाद्यतरिक्तसंस्कारप्रायश्चित्तं॥यजमानःउपनयनात्प्रा
ग्दिनेतद्दिनेवाप्राङ्मुखउपविश्य॥स्वदक्षिणतःसंस्कार्य
चोपवेश्य॥आचम्यपवित्रपाणिःप्राणानायम्यदेशकालौ
संकीर्त्यअस्यकुमारस्यगर्भाधानपुंसवनानवलोभन
सीमन्तोन्नयनविष्णुबलिजातकर्मनामकर्मनिष्क्रमणान
आद्यानांनानांसंस्काराणांस्वकालेऽकरणेनजनित

प्रत्यवायस्यपरिहारद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रतिसंस्कारं
पादद्रव्यछागमकंप्रायश्चित्तंप्रतिद्रव्यंयथाशक्तिगोनिष्क्रयद्रव्यदान
सामान्यंद्वारातथाऽस्यकुमारस्यचूडाकर्मसंस्कारस्यस्वकाले
ऽकरणेनजनितस्यप्रत्यवायस्यपरिहारद्वाराश्रीपरमेश्वरप्रीत्य
र्थं[illegible]र्धंअर्धंद्रव्यछागमकंप्रायश्चित्तंयथाशक्तिगोद्वयनिष्क्रयद्र
व्यदानपूर्वकंद्वाराऽहमाचरिष्ये॥पुनर्दैवकालौसंकीर्त्यग
र्भाधानाद्यनतिरिक्तसंस्काराणांकालातिपत्तिप्रायश्चित्तहोमंकर्तुं
स्थंडिलोल्लेपनादिसकलंकर्मकरिष्ये॥इतिसंकल्प्य॥स्थंडिलं
गोमयेनप्रदक्षिणमुपलिप्येत्यादिस्थंडिलसंस्कारंविधायतत्रवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमान टना र्यांगिनंप्रतिष्ठाप्यचत्वारिंशेतिध्यात्वा॥क्रियमाणेऽंत
रितसंस्कारप्रायश्चित्तहोमेदेवतापरिग्रहार्थमन्वाधानंकरि
ष्ये॥इतिसंकल्प्य॥अस्मिन्नन्वाहिते ग्नावित्यादिचक्षुष्यंते
त्रप्रधानं॥प्रजापतिंसमस्तव्याहृतिमंत्रेणप्रतिसंस्कारमे
कैकयाज्याहुत्याशेषेणस्विष्टकृतमित्यादिचक्षुष्यंतंहुत्वाप्रधा
नहोमंकुर्यात्॥समस्तव्याहृतीनांपरमेष्ठीप्रजापतिःप्रजा
पतिर्बृहती॥गर्भाधानायंतरितसंस्कारप्रायश्चित्तप्रधाना
ज्यहोमेवि०॥ॐभूर्भुवःस्वःस्वाहा॥प्रजापतयइदं॥इतिप्रति
संस्कारंहुत्वा॥पूर्वसंकल्पितप्रायश्चितीयद्रव्यंब्राह्मणायदा

॥२॥

॥२॥

नुमइत्युत्सृज्ये॥इत्युत्सर्गंकृत्वा॥स्विष्टकृदादिकर्मशेषंसमाप्य
॥अनेनगर्भाधानायंतरितसंस्कारप्रायश्चित्तहवनाख्येन
कर्मणाभगवान्परमेश्वरःप्रीयतां॥इतिगर्भाधानायंत
रितसंस्काराणांकालातिपत्तिप्रायश्चित्तत्रयोगः॥ ॥
इतिप्रायश्चित्तंकृत्वा॥अंतरितान्संस्कारान्कुर्याद्वावा
कुर्यात्॥अकरणपक्षेदेशकालौसंकीर्त्यअस्यकुमारस्य
गर्भाधानपुंसवनानवलोभनसीमंतोन्नयनविष्णुबलि
जातकर्मनामकर्मनिष्क्रमणान्नप्राशनानांनानासंस्काराणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥ अकरणजनितप्रत्यवायपरिहारार्थं प्रतिसंस्कारं प्राजाप
त्यात्मकं प्रायश्चित्तं प्रतिप्राजापत्यं यथाशक्ति गोनिष्क्र
यद्रव्यदानप्रत्याम्नायद्वारा अहमाचरिष्ये॥ प्रायश्चि
तीयद्रव्यं ब्राह्मणायथथाकालं दातुमहमुत्सृज्ये॥ इतिलो
पप्रायश्चित्तं॥ करणपक्षे कौस्तुभोक्तरीत्याकुर्यात्॥ देश
कालौसंकीर्त्य मोपनेतृत्वाधिकारसिद्धिद्वारा श्रीपर
मेश्वरप्रीत्यर्थं कृच्छ्रत्रयात्मकं प्रायश्चित्तं प्रतिकृच्छ्रं यथा
शक्ति गोनिष्क्रयद्रव्यं तथा मम गायत्र्युपदेशाधिकारा ॥३॥
र्थं द्वादशसहस्रसंख्या गायत्रीजपमहंकरिष्ये॥ अथवा द्वा

दशाधिकसहस्रसंख्यागायत्रीजपमहंकरिष्ये॥ ततोब्र
ह्मः देशकालौसंकीर्त्य मोपनेयत्वाधिकारसिद्धिद्वारा श्रीप
रमेश्वरप्रीत्यर्थं कृच्छ्रत्रयात्मकं प्रायश्चित्तं प्रतिकृच्छ्रं यथाश
क्ति गो० तथा मम कामचारकामवादकाममक्षणादिदोषप
रिहारद्वारा श्री० कृच्छ्रत्रयात्मकं० चरिष्ये॥ प्रायश्चितीय
द्रव्यं ब्राह्मणायअधदातुमहमुत्सृज्ये॥ इति प्रायश्चित्तत्रय
रणं॥ ॥ततः सपत्नीको यजमानः कुमारेण सहस्नाप्यांगः कृ
तोपनयनमंडपेवस्वाधादितेपीठे प्राङ्मुखोपविश्य स्वदक्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४॥ णतः पत्नीतद्दक्षिणतः संस्कार्यं चोपवेश्य॥ कुलदेवतादीनां नां
बूत्वसमर्पणं कृत्वा॥ आत्मनानमस्कृत्यद्विराचम्यपवित्रपाणिः
प्राणानायम्यदेशकालौ संकीर्त्यममास्यकुमारस्यबीजगर्भ
समुद्भवैनोनिर्हरणेनबलायुर्वर्चोभिरद्धिद्वारा श्रीप० चूडा
संस्कारं कर्मतथाममास्यकुमारस्यद्विजत्वसिध्यावेदाध्ययनादि
कारार्थं श्रीपरमेश्वरप्रीत्यर्थं उपनयनसंस्काराख्यं कर्मच
ष्यः करिष्ये॥ तत्रादौनिर्विघ्नतासिध्यर्थं गणपतिपूजनंपु
ण्याहवाचनंमातृकापूजननांदीश्राद्धं महाणामानुकूल्यार्थं ॥४॥

ग्रहमखंउपनयनांगंमंडपदेवतास्थापनंपूजनंचकरिष्ये॥ इति
संकल्प्यउक्तरीत्याकुर्यात्॥ पुण्याहवाचनेविशेषः॥ ममास्यकु
मारस्यश्वःकरिष्यमाणचौलोपनयनसंस्कारकर्मणोःपुण्या
हंभवंतोब्रुवंतु॥ इतित्रिः॥ कर्मभ्यांस्वस्तिभवंतोब्रुवंतु॥ इतित्रिः॥
कर्मणोःऋद्धिं भवंतोब्रुवंतु॥ इतित्रिः॥ कर्मणिऋध्येतां॥ कर्म
णोःश्रीरस्तिति भवंतोब्रुवंतु॥ इतित्रिः॥ इत्युपनयनपूर्वदिनं
कृत्यं॥ ॥अथोपनयनदिनेप्रातःकर्ता कृतमंगलस्नानंबा
लंपत्न्यंकस्यस्वदक्षिणस्थितमात्मनेऽउपवेश्य॥ द्विराचम्यऽपवि
त्रपाणिःप्राणानायम्यदेशकालौसंकीर्त्यममास्यकुमारस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वसंकल्पितचूडाकरणांगंहवनंकर्तुं स्थंडिलोल्लेपनादिस
कलंकर्मकरिष्ये॥ स्थंडिलंगोमयेनप्रदक्षिणमुपलिप्येत्यादि
स्थंडिलसंस्कारंविधायतत्रसभ्यनामानमग्निंप्रतिष्ठाप्य॥
चत्वारिशृंगेतिध्यात्वा॥क्रियमाणेचूडाकर्महोमेदेवतापरिग्र
हार्थंपन्नाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावित्यादाघारंघा
मुक्त्वाज्यप्रधानं॥त्रिरग्निंपवमानंजापित्वाज्यद्रव्येणस्वि
ष्टकृतमित्यादुक्त्वासमिद्वयमग्नावाधायपरिसमूहना
दिपूर्णपात्रनिधानांतंषट्पात्रप्रयोगतंत्रंकृत्वाग्नेरुदगास्ती ॥५॥

र्णेषुदर्भेषुव्रीहियवमाषतिलैःपृथक्पृथक्पूरितानिनयानिशा
वाणिचत्वारिक्रमेणैकैकशःप्राक्संस्थान्यासादयेत्॥माताप्रत्यग्ग्नि
रासीनस्यकर्तुर्दक्षिणतःकुमारमुत्संगेकृत्वासीत॥ततःकर्तामातुः
पुरस्तात्सश्चाग्नेरानडुहगोमययुतशरावंशमीपर्णयुतशरा
वंचनिदध्यात्॥ततोब्रह्मायेकविंशतिकुशापिंजूलान्यादाय मातु
र्दक्षिणतस्तिष्ठेत्॥पितावातथातिष्ठेत्॥अस्मिन्प्रक्षेन्यएवचो
लेकर्ता॥ततःकुमारेणान्वारब्धःकर्तापुरःस्तनमाघारांतंकृत्वा
ज्यधानहोमंकुर्यात्॥अग्नआयूंषीतिसूर्णांशतंवैखानसाऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयः॥अग्निःपवमानोदेवता॥गायत्रीछंदः॥चूडाकर्मप्रधानाज्य
होमेवि०॥ॐअग्नयेयूंषिपवसआसुवोर्जमिषंचनः॥आरेबाधं
स्वदुघांस्वाहा॥अग्नयेपवमानायेदंनमम॥यथालिंगंसाग०॥
ॐअग्निर्ऋषिःपवमानःपांचजन्यःपुरोहितः॥तमीमहेमहागयं स्वा
हा॥ॐअग्नेपवस्वःस्वपाअस्मेवर्चःसुवीर्यं॥दधद्रयिंमयिपो
षं स्वाहा॥ॐप्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥चूडाकरण
प्रधानाज्यहोमेवि० ॐप्रजापतेनत्वदेतान्यन्योविश्वाजातानि
परिताबभूव॥यत्कामास्तेजुहुमस्तन्नोऽस्तुवयंस्यामपतयो ॥६॥
योरयीणांस्वाहाप्रजापतयइदं॥ततःसीनोष्णंचोभेजलेदक्षिणवा

मकरास्यांक्रमेणपात्रयोःपृथग्गृहीत्वाग्नेःपश्चिमप्रदेशेस्थित्वात
द्दक्कद्वयमन्यस्मिन्पात्रेपाणिभ्यांउष्णेनवायउदकेनेहीतिमंत्रेणयुगप
द्विनीयनदेकदेशंगृहीत्वानवनीतेनदधिद्रप्सेनवाभिश्रथित्वाकुमारस्य
वामकर्णमारभ्यदक्षिणं॥ॐअदितिःकेशान्वपत्वापउंदंतुवर्चसइ
तिमंत्रेणशिरस्त्रिवारंक्लृदयेत्॥प्रतिक्लृदनंमंत्रावृत्तिःततोब्रह्महस्तस्थैर्ने
कविंशतिकुशपिंजूलंमध्येत्रीणिकुशपिंजूलान्यादायॐओषधेत्राय
स्वैनमितिमंत्रेणकुमारामिमुखंपश्चिमाग्राणिनस्यदक्षिणेकेशभागे
निधायनेषुनाम्रमयंक्षुर॥ॐस्योनेमैनंहिंसीरितिनिधायॐयेत्र्यंबके
यजामहेनावपत्सवितास्तुरेणसोमस्यराज्ञोवरुणस्यविद्वान्॥तेनब्रह्माणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपूतेदमुस्यायुष्मांजुरदृष्टिर्यथासत्॥इतिमंत्रेणसकेशा कु
शापिंजूलानिधित्वाप्रागग्राणिकृत्वाशरावसंस्थेवह्नावीपर्णे
रेकीकृत्यप्रातुःकरेदधात्॥साचनानिसकेशान्यानजुहेगो
मयेप्रागग्राणिनिदध्यात्॥एवंद्वितीयादिछेदनेषुपिंजूलानि
धानादिसमंत्रेकंकार्यं॥छेदनमंत्रेतुविशेषः॥ॐयेनधौता
बृहस्पतेरग्नेरिंद्रस्यचायुषेवपत॥तेनतआयुषेवपामिसुश्लो
क्यायस्वस्तये॥इतिद्वितीयछेदने॥ॐयेनभूयश्चराज्यांज्यो ॥७॥
कपश्यातिसूर्यं॥तेनतआयुषेवपामिसुश्लोक्यायस्वस्तयेति

तृतीयछेदने॥चतुर्थेतुॐयेनावपसविताॐयेनधाताबृहस्प
तेॐयेनभूयश्चॐत्रयोपिमंत्राः॥एवंदक्षिणेकेशभागेचत्वारिछेदना
निकृत्योत्तरेपिकेशभागेएवमेवत्रयेकंमंत्रैराद्यानि।त्रीणिछेद
नानिकुर्यात्॥ततुसर्वैर्मंत्रैश्चतुर्थंगततःक्षुरेणमर्चयतासु
पेशसावसावर्षसिकेशान्॥सुधिशिरोमास्यायुःप्रमोषीति
मंत्रेणाग्रतआरभ्यमूलपर्यंतंक्षुरधारांनिमृज्यनापितमाहू
य॥ॐशीतोष्णाभिरक्षिरवर्थंकुर्वणोक्षण्वन्कुशलीकुर्वि
तिग्रैषेणानुज्ञास्यातंग्रैषार्थंचावबोध्यनापितेनपूर्ववद्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षितशीतोष्णांबुभिरार्द्रवस्त्रेकुमारंशिरोयथाचारंकल्पि
तशिखांवापयित्वाकुमारंस्नापयित्वाभूषयित्वापू
र्ववन्मातुरुत्संगेअवस्थाप्यस्विष्टकृदादिहोमशेषंसमा
प्यश्रीघ्रादिपूर्णशरावंचतुष्टयंनापितायदद्यात्॥अतस्य
चूडाकरणकर्मणःसांगतायैतत्संपूर्णफलावाप्त्यर्थं
दशसंख्याकान्ब्राह्मणान्यथाकालंयथोपपन्नेना
न्नेनभोजयेत्ये॥अतस्यचूडाकरणकर्मणःसांगता॰ ॥८॥

नानानामगोत्रेभ्योब्राह्मणेभ्योभूयसींदक्षिणांदातुमहमुत्सृज्ये॥
अनेनमयाकृतेनदेशकालाद्यनुसारतःअस्यकुमारस्यचूडा
करणसंस्काराख्येनकर्मणाभगवान्परमेश्वरःप्रीयतां॥
॥इतिचूडाकरणप्रयोगः॥॥ततःबंधुमित्रासहभोजनंकुर्यात्॥ततोब्रह्मचारिभ्योभोजनंदेयमित्याचारः॥ततःदेशकुलौसंकीर्त्यअस्यकुमारस्योपनयनंकर्तुतस्याभ्यांगभूतंवापनादिकरिष्ये॥इतिसंकल्प्यवपनंकृत्वास्नातमहतवस्त्रेणदक्षिणंश्रुतमंगलतिलकंबद्धंकुर्युः॥ततःआचार्यवेद्यांप्राङ्मु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ स्वोपविश्यात्मनोग्नतः आच्युच्चबटुमुपविश्य॥पश्चेदुदङ्मुखं
स्वस्तिकांकितमंतःपटंधृत्वामंगलारक्तानिपठित्वांतःप
टमुद्घृत्यक्रियमाणेज्योतिर्विदुक्तेसुल
ग्नसमयेबटुंस्वसमीपमानीयपित्रांतन्मुखंसम्यगीक्षे
त॥येयज्ञेनेतिब्राह्मणाःसूक्तंपठेयुः॥ॐयेयज्ञेनदक्षिण
यासमक्तापंचवर्ग॥नदस्तुमित्रावरुणाऋकु॥गृहावैप्रति
ष्ठासूक्तं॥ततःबटुंस्वदक्षिणतउपविश्य॥देशकालौसंकीर्त्य
ममास्यकुमारस्योपनयनसंस्कारकर्मणःसांगतायेतत्संपूर्णफलाप्त्यर्थं ॥१॥

नानानामगोत्रान्ब्राह्मणान्गंधादिनापूजयित्वा॥
तेभ्योभूयसींदक्षिणांदातुमहमुत्सृज्ये॥कर्मांगदेवताःस्व
रूपंपरमेश्वरःप्रीयतां॥देशकालौसंकीर्त्यास्यकुमारस्यद्वि
जत्वसिध्यर्थमुपनयनागंहवनंकर्तुस्थंडिलोल्लेपनादिस
कलंकर्मकरिष्ये॥स्थंडिलंगोमयेनप्रदक्षिणमुपलिप्येत्या
दिस्थंडिलसंस्कारंविधायतत्रसमुद्भवनामानमग्निंप्रतिष्ठा
प्यचत्वारिशृंगेतिध्यात्वा॥क्रियमाणेउपनयनहोमेदेवता प
रिग्रहार्थमन्वाधानंकरिष्ये॥अस्मिन्नन्वाहितेग्नावि[illegible]या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चारांतमुक्त्वात्रयधानं।।त्रिरग्निपवमानंप्रजापतिंचाज्येनद्रोषेवास्वि
ष्टकृतमित्याघाज्यसंस्कारांतंकृत्वा।।कौपीनार्थंचिरंतंकार्पास
सूत्रंकृत्वाबध्यकोपीनंपरिधाप्यद्वितीयज्ञन्मनुल्बप्रतिनिधि
भूतमहतेनवस्त्रेवासःसमंत्रंपरिधाप्यान्येनकाषायवाससातथै
वत्रावारयेत्।।तत्रमंत्रः।।युवंवस्त्राणीत्यस्यत्रोचथ्योदीर्घतमा
मित्रावरुणोत्रिष्टुप्।।वासोधारणेविनियोगः।।युवंवस्त्राणि
पीवसावसाथेऽसचेथे।।आवरणार्थंकृष्णाजिनंवा।।मित्रस्य
चक्षुरित्यस्यवामदेवोजिनंत्रिष्टुप्।।अजिनधारणेविनियोगः।।

ॐमित्रस्यचक्षुर्धरुणंबलीयस्तेजोयज्ञास्विस्त्यविरंसमिद्धं।।अनाह
नस्यंवसनंजरिष्णुपरीदंवाज्यसिनंदधेहं।।ततोद्विजत्वचिन्हार्थंयज्ञो
पवीतंदधात्।।ततआचार्यःयज्ञोपवीतमभिमंत्र्य।।ततोबटुर्दंडाका
लेसंकीर्त्यश्रौतस्मार्तकर्मानुष्ठानसिध्यर्थंयज्ञोपवीतधारणंकरि
ष्ये।।इतिसंकल्प्य।।यज्ञोपवीतमित्यस्यपरब्रह्मपरमात्मात्रिष्टुप्।।
यज्ञोपवीतधारणेविनियोगः।।ॐयज्ञोपवीतंपरमंपवित्रंप्रजापते
र्यत्सहजंपुरस्तात्।।आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंब
लमस्तेजइतिमंत्रंवाचयित्वादक्षिणबाहुमुद्धार्यउपवीतंधारयि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४ वार आचमन करणे

स्याकुमारमात्मनोग्नेरुत्तरमध्येन पर्जन्यपात्रोत्तर भागंगमयि
त्वातत्रविधिवदाचम्यपुनस्तथैवानीयस्वदक्षिणेउपविश्य
बर्हिरास्तरणादिस्रुवसंमार्जनांतंकृत्वाप्रधानहोमंकुर्यात्॥
अग्नआयूंषीतित्तिसृणांशतंवैखानसाऋषयः॥अग्निःप
वमानोदेवता॥गायत्रीछंदः॥उपनयनप्रधानाज्यहोमेवि०॥
ॐअग्नआयूंषिपवस०॥ॐअग्निर्ऋषिःपवमान०॥ॐअ
ग्नेपवस्वःस्वपा०॥प्रजापतेहिरण्यगर्भःप्रजापतिःस्विष्टुप्॥
उपनयनप्रधानाज्यहोमेवि०॥ॐप्रजापते०॥प्रजापतयइदं०॥

॥१२॥

अथाचार्यउत्तरतोग्नेःप्राङ्मुखस्तिष्ठेत्कुमारोप्यग्न्याचा
र्ययोर्मध्येनगत्वाचार्यस्याभिमुखस्तिष्ठेत्॥अथाचार्यःसंय
तात्मकुमारस्य[illegible]चित्वसिद्धयेसवितृदेवतातस्ययेचांजलि
श्चारणंकुर्यात्॥[illegible]ज्येष्ठं॥शुद्धोदकेनशिष्यांजलिमापूर्यस्व
स्यांजलिमन्येनपूरयित्वा॥तत्सवितुरितिस्यऋषाबाश्वःस
विनानुष्टुप्॥अवश्चारणेवि०॥ॐतत्सवितुर्वरेणीमहेवयंदेव
स्यभोजनं॥श्रेष्ठंसर्वधातमंतुरंभगस्यधीमहि॥अनेनमंत्रे
णस्वांजल्युदकंशिष्यांजलाववक्षार्यतज्जलंकुमारांजलिने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ वावक्षारयेत्॥ततःशिष्यत्वसिध्यर्थंबटोर्हस्तंगृह्णीयात्॥
तत्रमंत्रः॥देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ता
२ भ्यांहस्तंगृह्णामितियजुरंतेअमुकशर्मन्नितिकुमारस्याधि
वादिनिकंनामशर्मांतंसंबुध्यानिर्दिश्यदक्षिणेनपाणिनाकु
मारस्यसांगुष्ठदक्षिणंपाणिंगृहीत्वापुनरपिपूर्ववदुदकपू
२ रणादिकृत्वासवितातेहस्तमग्रभीदितिमंत्रांतेपूर्ववद्बटुना
मोक्षोहस्तंगृहीत्वापुनरपिपूर्ववद्यजुरंतेअग्निराचार्यस्तवे
तिमंत्रांतेपूर्ववत्तन्नामनिर्दिश्यहस्तंगृह्णीयात्॥अथाचार्यो

ब्रह्मचारिणासहनिष्क्रम्यदेवसवितरेषतेब्रह्मचारिंगो
पायसमापयेतेसुआर्यसंरक्षणार्थंव्रतपतयेत्वादिसायव
ंददामीतिमनसास्मरन्॥ब्रह्मचारिणमादिसमीक्षेत॥
(तंतउभावपिपूर्ववदुत्तरंतोग्नेरन्योन्याभिमुखौतिष्ठेतां॥
अथाचार्यः॥कस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिक
स्याकमुपनयनेकापत्नीपरिददातीतिमंत्रंजपन्प्रजापत
येसंरक्षणार्थंसमर्प्य॥युवासुवासाइत्यस्यकौत्सोवि
श्वामित्रोमूपस्त्रिटुप्॥पूर्वार्धंचस्यप्रदक्षिणमावर्तनेउत्त

मनसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रार्घ्यस्यपाणिभ्यांबहुद्रयालंभनेवि०ॐसुवासुवासाः-
परिधीतुआगा॰सशुश्रेयोन्भवतिजायमानः॥इत्यर्घ्यंपु
ष्पारयन्बहुप्रदक्षिणमावर्त्याङ्गुष्ठमवस्थापयेत्॥
ततःकुमारंसयोरुपरिस्थवामपाणीगमयित्वा॥ॐ
तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतः॥
इत्युत्तरार्धपुच्चार्यतद्धृदयप्रदेशंसकलाभिर्व्याप्य
शेत्॥ततआचार्यःआत्मानमग्निंचान्तरेणबहु

नीलाग्रसगग्नेःस्वयमुपविश्यस्वदक्षिणतःप्राङ्मुखंतमुप
वेशयेत्॥ततोबहुरग्नेःपरिसमूहनपर्युक्षणेकृत्वाकृत्तिका
रमतेस्वकृत्वा॥अग्नयेसमिधमित्यस्यहिरण्यगर्भोग्निर्व
सिष्ठपदाहुती॥समिदाधानेविनियोगः॥ॐअग्नयेस
मिधमाहार्षंबृहतेजातवेदसेगायत्राछंदसेत्वमग्नेव्रतपास्वसमि
धाब्रह्मणोवयंस्वाहा॥अग्नयइदं॥पाणिंप्रक्षाल्याग्निंस्पृष्ट्वा॥
ॐतेजोसामासमनज्मीन्द्रियंसंवृतोहृदयंमुखमधाङ्मृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यपाणिंप्रक्षाल्यपुनरग्निंस्पृष्वामंत्रेणतथैवमुखंनिमृज्य
पाणिंप्रक्षाल्याग्निंस्पृष्वामंत्रेणतथैवमुखंनिमृज्यपाणिं
प्रक्षाल्यतू ।। ततस्तिष्ठन्प्रणीतामुद्रांकृत्वा ।। मयि
मेधामग्निर्वृषण्णाहिरण्यगर्भऋषिः ।। पूर्वेषांत्रयाणा
मग्नीद्रसूर्यादेवताउष्णिक्त्रयाणामग्निर्देवतानिषण्णा
मासुरीगायत्रीछंदः ।। अग्न्युपस्थानेविनियोगः ।। ॐ
मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातु ।। मयिमेधां

मयिप्रजांमयींद्रइंद्रियंदधातु ।। मयिमेधांमयिप्रजांम
यिसूर्योभ्राजोदधातु ।। ॐ यत्तेअग्नेतेजस्तेनाहंतेजस्वी
भूयासं ।। यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं ।। यत्ते
अग्नेहरस्तेनाहंहरस्वीभूयासं ।। इतिषडंमंत्रैरग्निमुप
स्थाय ।। मानस्तोकेतिकुत्सोरुद्रोजगती ।। विभूतिर्ग
णोविनियोगः ।। ॐ मानस्तोकेतनयेमानआयो• महो।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनेनमंत्रेणभस्ममादाययथाचारं।ॐत्र्यायुषंजमदग्नेरिति
ललाटे।कश्यपस्यत्र्यायुषमितिकंठे।त्र्यगस्यत्र्यायुषमितिना
भ्यां।।यद्देवानांत्र्यायुषमितिदक्षिणांसे।तन्मेत्र्यरक्षत्र्यायुषमि
तिवामांसे।।कलात्र्यायुषमितिशिरसिभस्मधारयेत्।।पुनःपरि
समूहनपर्युक्षणंकृत्वाकृतांजलिस्तिष्ठन्।।ॐवाचमेस्वरश्च
मेयज्ञेनकल्पतांप्राणमश्च।।यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तंतस्मै
तेनमः।।स्वस्तिश्रद्धांमेधांयज्ञैःप्रज्ञांविद्यांबहुंश्रियंबलं।।
त्रायुष्यंतेजआरोग्यंदेहिमेहव्यवाहन।।इत्यग्निमुपस्थाय।।

१५

अग्नेरुत्तरतोगत्वाप्रसंमुखीभूयाचार्याभिमुखोभूत्वा
दक्षिणंजानुभूतलेनिधायपाणिभ्यांयथासव्यदक्षिणश्रो
त्रेसंस्पृश्यव्यस्तपाणिराचार्यदक्षिणपादंस्वदक्षिणहस्ते
नसव्यंचसव्यहस्तेनजानुपर्यंतिपादपर्यंतंस्पृष्ट्वामुक
गोत्रोमुकशर्माहंभोगुरोअभिवादयामिसुच्चारयन्नात्मा
नंनतिपूर्वकंवदेद्याचार्येणायुष्मानेधिसोम्यदेव
दत्तशर्माइतिप्रत्युक्तआशीर्वादोविनयावनतोभूत्वासावि
त्र्युपदेशंवांछन्नधीहिभोःसावित्रीमेअनुब्रूहियाचार्यंब्रूयु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१६॥ क्कावा यपाणिमुत्तानीकृत्य दक्षिणपाणिं प्रसव्यमुखीकृत्य
संधाय पाणिपृष्ठमंगुलीश्चांगुष्ठौ च दृढीकृत्य तां ब्रह्मां
जलिं दक्षिणांके निक्षिप्याचार्यांतिकआसीनो याचार्य
स्तदंजलिंतत्परिधानीयवाससाआछाद्यस्वपाणिभ्यां नदं
जलिंपरिगृह्यप्रणवव्याहृतीपूर्वकां सावित्रीप्रथमः पाद
शः स्वयमुक्त्वाचयेत्॥ नद्यथातंडुलान्नेकांस्यपात्रेप्रसा
र्यतदुपरिगायत्रीत्तिरिवत्यागायत्र्यैनमृतिषोऽर्घोपचा ॥१६॥
रैः संपूज्यप्रणम्य॥ प्रणवस्यपरब्रह्मऋषिः परमात्मादेवता

दैवीगायत्रीछंदः॥ व्याहृतिमंत्रस्य॥ प्रजापतिः प्रजापतिर्बृहती॥ गायत्र्या
विश्वामित्रः सविता गायत्री॥ उपनयनेविनियोगः॥ गायत्रीं वाचयित्वा॥ त
तः मम व्रतेइतिमंत्रस्यप्रजापतिर्ऋषिः॥ बृहस्पतिर्देवता॥ त्रिष्टुप्छंदः॥ ब
योर्हृदयेऊर्ध्वांगुलिपाणिनिधानेविनि०ॐ मुमव्रतेहृदयंतेदधामिममचि
त्तमनुचित्तेतेअस्तु॥ मम वाचमेकव्रतोजुषस्वबृहस्पतिष्वानियुन
क्तुमह्यमितिस्वपाणिमूर्ध्वांगुलिब्रह्मचारिणोहृदयदेशेनिधा
यतत्स्यर्धार्थंशुध्यर्थंचमेखलामाबध्नीयात्॥ इयंदुरुक्तादिति
द्वयोर्वामदेवोमेखलात्रिष्टुप्॥ मेखलाबंधनेविनियोगः॥ ॐ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इयंदुरुक्तात्परिबाधमानावर्मवरूथंपुनतीनआगात्॥प्राणापानाभ्यां
बलंमाभरतीप्रियाद्वानांसुभगामेरयंलेयं॥ऋतस्यगोपात्रीतप
सःपरस्पीघृतीर्द्युःसहमानात्ररातीः॥सानःसमंतमनुपरे
हिभद्रयाभर्तारंस्तेमेखलमग्निषामेतिवाचयित्वामेखलांत्रिरा
वृत्यानाभित्रदेवेग्रंथित्रयंकुर्यात्॥तदाबटुःरहस्यंगसहित
वेदत्रयेणाभितिमुन्येत॥ततस्तद्धस्ययोगक्षेमार्थंमधर्मनिच
त्तयेचकेत्रासंमितपलाशदंडंदद्यात्॥स्वस्तिनइत्यस्यस्वस्त्या
त्रेयोविश्वेदेवास्त्रिष्टुप्॥दंडदानेविनियोगः॥ॐस्वस्तिनोमि

मीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः॥स्वस्तिपूषाअघ्नो
दधातुनःस्वस्तिद्यावापृथिवीसुचेतुना॥ततोबटोरुद्रोहेयोमं
त्रः॥अदांतंमयित्वामांमार्गंसंस्थापयस्वयं॥दंडेःकरेरस्थितो
यस्मात्तस्माद्रक्षयेतोभयमितिवाचयेत्॥ततःकुमारस्याचार
मादिशेत्॥ब्रह्मचार्यस्याचमनंकुरु॥मूत्रपुरीषादौशुध्यर्थमित्य
र्थः॥कर्मकुरु॥संध्योपासनादित्यर्थः॥दिवामास्वापसीः॥आचा
र्याधीनोवेदमधीष्वसायंप्रातर्भिक्षेथाः॥सायंप्रातःसमिधमाधे
हिहादशवर्षाणिवेदग्रहणंतवाब्रह्मचर्यंचरेति॥प्रेषार्थंबोधये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तूष्णीं तत: स्विष्टकृदादिहोमशेषं समाप्य ॥ अग्निमेधाजननांतरक्षे
तूष्णीं तत्रैवसायंप्रातरग्निकार्यं कुर्यात् ॥ ततोऽत्रानुप्रवचनीयहोमब्रा
ह्मणभोजनपर्यासांतं उलरूपांभिक्षां याचयेत् ॥ तत्र क्रमः ॥ भिक्षा
पात्रमादायादौमातरंभवतिभिक्षांददाक्षिति अथवापितरं वाभ
वान्भिक्षांददात्वियेवं मातुः स्वसारं भगिनीमन्यानपिबांधवानत्र
ख्याख्यायिनोप्रख्याख्यायिनी अथयाचयित्वाभैक्ष्यमाचार्यायनि
वेद्य ॥ मध्याह्ने संध्यां कुर्यादितिप्रयोगयाज्ञिकाः ॥ नेतिकुछभट्टी
कारः ॥ ब्राह्मणानामृषीणामृणं ॥ हुतस्येपनयनसांगतासिध्यर्थं ॥ १८

स

तसंख्याकान्ब्राह्मणान्यथाकालंयथोपपन्नेनान्नेनभोजयित्वा
द्विरातसंख्यावा ॥ ततोगुरुसंन्निधायचपल्लस्तिष्ठन्नहःशेषंनीत्वा
सायंवंदितसंध्यात्रोपनयनायनिकाग्नेरंतिकमासीनः आचम्य
प्राणानायम्यसायमग्निकार्यंकरिष्येइतिसंकल्प्य ॥ परिसमुह्यपर्यु
क्ष्यपूर्ववत्समिधमाधायत्रिर्मुखंपूर्ववदवद्यज्यऊषणमंत्रेरूपेस्तृ
य ॥ मानस्तोकेतिमस्तमादायज्यायुषमितितत्स्थानेषुपूर्ववद्धृत्वा
पुनःपरिसमूहनपर्युक्षणंकृत्वाकृतांजलिस्तिष्ठन्नोंचमइत्युपतिष्ठे
तूष्णीं ॥ अथाचार्यस्तमितेग्नेःपश्चात्स्वासीनः ॥ ब्रह्मचारिणंदक्षिणत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पवेत्रूप ॥ देवाकालो संकालो संकीर्य उपनयनांग भूत मनुप्रवचन
यहोमंकरिष्ये ॥ इति संकल्प्य ॥ अथकरिष्यमाणेअनुप्रवचनीय
मेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये अस्मिन्वाहिलेग्नाविस्था
द्याघारांतमुल्कात्रप्रधानं ॥ सदसस्पतिं सम्वितारमृषीन्त्रधान
वताश्चरुद्रव्येणशेषेणस्विष्टकृतमित्यादिप्रणीताप्रणयनांतं
त्वानद्रिधारव्यंचतुरश्चतुरो मुष्टींतूष्णींदेवतात्रयस्यत्रिप्रत्रयभ
जनस्यचपर्यायंनिरूप्यतूष्णींप्रोक्ष्यत्रिरवदान्यत्रिःफलीकृत्यत्रिः
क्षाल्यश्रपयित्वाश्रितस्थालीपाकस्याचार्यायनिवेदयेद्वुः ॥ बधो

रेवंकरणाश्रस्रोतहंधुनान्येनवाकारयेत् ॥ ततोब्रह्मचारिणोन्वारब्धा
गुरुराज्यसंस्काराद्याघारांतंहुत्वा अनुद्धृतचरुणासमंत्रकंहोमंनोद्धा
रणमितिपरिभाषोक्तेः ॥ प्रधानहोमंकुर्यात् ॥ अथदानधर्मेणावदाय ॥
सदसस्पतिमित्यस्यकाण्वोमेधातिथिः सदसस्पतिर्गायत्री ॥ अनुप्रव
नीयप्रधानचरुहोमेवि० ॐ सदसस्पतिमद्भुतंप्रियमिंद्रस्यकाम्यं ॥ स
मेधामयासिषंस्वाहा ॥ सदसस्पतयइदंतस्सवितुरित्यस्याग्नाधिन
विश्वामित्रःसवितागायत्री ॥ अनुप्रवेचनीयप्रधानेचरुहोमेवि० ॐ
सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात्स्वाहा ॥
सवित्रेदं० ॐ ऋषिभ्यस्वाहा० ऋषिभ्यइ० एवंत्रिभिर्मंत्रैर्हुत्वाऽ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षड्ऋतादिहोमनक्षेषंसमाप्य॥ऋतस्यानुग्रवचनीयहोमकर्म
सांगतायैतत्संपूर्णफलावाप्त्यर्थंग्रनुग्रवचनीयहोमावस्विष्टकृन्नि
रानरब्राह्मणाभोजयिष्ये।तैर्वेदसमाप्तिंवाचयेत्॥ततोब्रह्मचा
क्षारमलवणमंनंभुक्त्वाघःस्थीत॥मेधाजननंयावदेवमेवंगुरु
प्रसादयन्वर्तेत॥३त्युपनयनं॥ग्रथोपनाग्निनाराधायश्रित
मेधाजननात्पूर्वकालीनाग्निकार्यंयावदुपनयनाग्निनाग्रेउपनयन
हुतिभिः॥कृत्सूत्रधारणादिमाणवकसंस्कारावक्षारणाग्निकार्य
णायत्युपदेशवजेपूर्वोत्तरतंत्रसहिताभिरग्निमुखाद्यत्रानुग्रवच

नीयपूर्वंभाव्यग्निकार्यपूर्वकमनुग्रवचनीयादिकार्यंगदेशकालौ
संकीर्त्यपोपनयनाग्निनाराजनितप्रत्यवायपरिहारार्थंप्राय
श्चित्तहोमंकरिष्ये॥नदंगंस्थंडिलोल्लेपनादिसकलंकर्मकरिष्ये
इतिसंकल्प्य॥आयतनस्थंभस्यदूरीकृत्योपलेपादिकृत्वास्थं
डिलंगोमयेनग्रदक्षिणमुपलिप्यैत्यादिग्राघारांतमुक्त्वाग्र
धानं॥त्रिरग्निपवमानंप्रजापतिंचाज्येनशेषेणस्विष्टकृतंजि
त्यादिग्राघारांतंहुत्वाप्रधानहोमंकुर्यात्॥ग्रग्नग्रायूंषीतितिस्र
णांशंतंवैखानसाऋषयःग्रग्निःपवमानोदेवतागायत्रीछं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपनयनाग्निपुनःसंधानप्रधानाज्यहोमेवि०॥प्रजापतिर्हिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥उपनाग्निपुनःसंधानप्रधानाज्यहोमेवि०॥स्विष्टकृदादिहोमशेषंसमाप्यानेनोपनयनाग्निनाराप्रायश्चित्तहोमाख्येनकर्मणाभगवान्परमेश्वरःप्रीयतां॥इत्युपनयनाग्निनाराप्रायश्चित्तंकृत्वाग्निकार्यंकुर्यात्॥अथमेधाजननप्रयोगः॥आगुक्तक्रमेणाचरितब्रतस्यब्रह्मचारिणोमेधासिध्यर्थंमाचार्यश्चतुर्थेऽह्निमेधाजननाख्यंकर्मकुर्यात्॥तत्रायंक्रमः॥प्रत्यग्वायव्योदक्

21

गुदम्मूर्वान्यतमस्यादिनिर्गुण्डाश्वार्जितंपालाशंतदभावेसर्वतोदण्डंगुलांत्रिपेखलांवेदीकृत्वोतस्यांपत्राङ्कुरसमन्वितामार्द्रपलाशशाखांसमूलाङ्कुरास्तंबवांप्रतिष्ठाप्य॥ब्रह्मचारिणान्वारब्धःसंकल्पपूर्वंकंपूजांकुर्यात्॥तत्रक्रमः॥देशकालौसंकीर्यमपकुमारस्यपुनयनब्रतसमाप्तिवेदग्रहणसामर्थ्यलक्षणमेधासिद्धिद्वाराश्रीपरमेश्वरप्रीत्यर्थंमेधाजननाख्यंकर्मकरिष्ये॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिसंकल्प्य॥शौनकमतेपुण्याहवाचनमपिकृत्वामेधा
जननकर्मणिपूर्वोक्तफलसिध्यर्थंमेधापरनामकसावि
त्रीपूजांकरिष्ये॥इतिसंकल्प्यपलाशशाखायांमेधायेन
मइतिनाममंत्रेणावाहनाद्युपचारैरभ्यर्च्यावकसकुमो
दकमिश्रमन्नंनिवेद्यपुनश्चपूर्ववदभ्यर्च्यअग्नेचारिणाप्र
२२ णप्यशुद्धेजलपात्रोदकेनसेचनंकुर्वतावटुनाचिःप्रदक्षि
२३ णंकारयमंत्रंवाचयेत्॥प्रणाययेच्च॥ॐसुश्रवःसुश्रवा

२२

मा

असियथात्वंसुश्रवःसुश्रवास्यवंसुश्रवःसोश्रवसंकृधि॥
यथात्वंदेवानांयज्ञस्यनिधिपोस्येवमहंमनुष्याणांवेदस्यनिधि
पोभूयासमितिप्रदक्षिणंमंत्रावृत्तिः॥प्रणामंचएकमेवका
रयेत्॥ततोब्रह्मचारीस्नात्वानवान्यज्ञोपवीताग्निंनमेखलादंडा
नुपनयनवस्त्रमंत्रंधृत्वापुराणानिपलाशासंनिधौविसृज्यपूर्व
धृतवाससीगुरवेदत्वामेधामस्यमितिसूक्तंविप्रैःपठित्वाविधि
वत्स्वस्तिवाचनंकृत्वाब्राह्मणेभ्योयथाशक्तिदक्षिणांदत्वाता २५
ग्नियज्ञानमस्कृत्वात्रिषोगृणेहीयात्॥अथमेधामह्यमितिस
तं॥ॐमेधामह्यंमंगिरसोमेधांसप्तऋषयोददुः॥मेधामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्र श्चाग्निश्चमे धां धाता ददा मे ॥ मे धां मे वरुणो राजा मे धां देवी सर स्व
ती ॥ मे धां मे अश्विनौ देवावा धत्तां पुष्कर स्रजा ॥ यां मे धाम प्र सेपं
वेषु चयन्मनः ॥ दैवीया मानुषी मेधा सामाया विशाता दिमां ॥ यन्मे
गाङ्कु तइ मताञ्छके यं यदनुब्रुवे ॥ निऋा मतं निऋा मये मयि ब्रह्म तंस
हस्रियेण भूयासि ब्रह्मणा सग मे मस्हि ॥ शरीरं मे विश्रणं वाङ्मे मधुन
घुहु रा ॥ अवृहन्महमसोसू र्यो ब्रह्मणा आणीस्थ श्रुतेमे मा प्रहासीः ॥
मे धां देवीं मन सारेजे मानां गे धवेजु ष्टां प्रग्नि नोजुषस्व ॥ मय्यग्नेधां व
दृय्यं श्रियं वदमे धावी भूया समग्निर्हि राज रिक्ष ॥ सदसस्पति मद्भु
तं प्रियमिंद्र स्यकाम्यं ॥ सनिं मे धाम यासिषं ॥ या मे धां देवगणाः

23

पितर श्चोपासते ॥ तया मामद्य मेधया ग्नेमेधाविनं कुरु ॥ मेधा व्यु
हंस्कमनाः स्कमस्तीकः अद्धा मनाः सयमुतः स्करोवः ॥ महा यज्ञाधा
रयिष्णु प्रवक्ता भूयासम स्येस्वधया न्न योगे ॥ इतिमे धाजननन्न योग
अथ देवकोत्थापन विधिः ॥ तत्र कालः ॥ समे चरदिवसे कुर्या द्देव कोत्था
पनं बुधः ॥ षष्ठं चदिव संनेष्टमुक्वा पंचम सप्तमो ॥ उक्तेकालेमंडपं
सपत्नीकः स्वासनेउपविश्याचम्यपवित्रपाणिः प्राणा नायम्यदेश्य
लोसंकीर्त्यउपवेशनांगत्वेनस्वपितृदेवता नामुत्थापनं मंडपोद्वाह
नंपुण्याहवाचनंकरिष्ये ॥ आवाहितदेवता नांपंचोपचारैः पूजनं

ॐउत्तिष्ठब्रह्मणस्तेदेवयंतस्तेमहे॥उपप्रयंतुमरुतः सुदानवइंद्र
श्रर्भवासचा॥अनेनमंत्रेणो थाप्य॥मंगलघोषेणबहिरंगपोश्राः
पभंगवस्यादीनांतैलाभ्यंगोदृत्तनोच्छोदकेनस्नानंकार्यित्तावेष्टनरः
त्रमुच्य॥ततोद्विजेनाभिषेकःकार्यःपुरोधातछात्रवादिवस्त्रापात्रनि
धायतेदुपरिजलंप्रक्षिप्यासकुंदुंवयंजमानशिरसिकिंचिदाघ्रा
नू॥प्रेतिचेतिचेत्येतद्देसर्वंस्वस्ययनंयस्येतिचेतिचेतिनयोस्यग्र
यस्यान्तमेतेनानुमंत्रयेतप्रेतिचेतिचेतिस्वस्त्येवगछतिस्वस्तिपुनरा
गछतीब्राह्मणेपठेत्॥एवंत्रिःकुर्यात्॥ततःकर्त्रीबद्धांजलिरसमक्षेत्रै
षुषट्सवष्टसुमासेषुसोमनेमस्तिवतिभवंतोब्रुवंतु॥इतिद्विजान्प

ोक्षायनमः॥अथब्रह्मचारिव्रतलोपप्रायश्चित्तं॥तत्रबोधाय
श्रत्रद्वोचाचमनसंध्यावंदनदर्भभिक्षाग्निकार्यराहित्यभूदारि
नकौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनत्यागदिवास्वा
त्रधारणपादुकाध्यारोहणमालाधारणोदृर्तनानुलेपनांजनज
ोडायूतनृत्यगीतवाद्याद्यभिरतिपारुष्यादिसंभाषणपर्यूषितभोज
ब्रह्मचारीव्रतलोपजनितसकलदोषपरिहारार्थंब्रह्मचारीछ
प्रायश्चित्तंतद्यामहानाम्न्यादिव्रतचतुष्टयलोपजनितघ्रस्यवायप
तार्थंचछछचतुष्टयंछंसप्तछश्रीमकंप्रायश्चित्तंयथान्नक्रिय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थं येत्॥ ततोद्विजांश्चदक्षिणादिना तोषयेत्॥ देशकुलाचारानुसा
रेणसर्वं कार्यं॥ इतिदेवकोत्थापनविधिः॥ इतिउपनयनप्रयोगः॥
॥ ॥ ॥श्रीदत्तात्रेयार्पण॥श्रीजगदीश्वरायनमः॥ ७॥ ७॥
॥२५॥ पत्रसंख्या २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=28.08.19 12:29
,TRANSFERRED=2019/08/28 at 12:36:37
,PAGES=28
,TYPE=STD
,NAME=S0001579
,Book Name=M-764-AASHVAKAYAN UPNAYAN PRAYOG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection